# Vaidyanathasthale Siddhamritatirthamahatmyavarnanam

# વૈદ્યનાથસ્થલે સિદ્ધામૃતતીર્થમાહાત્મ્યવર્ણનમ્

## Document Information

Text title : Vaidyanathasthale Siddhamritatirthamahatmyavarnanam

File name : vaidyanAthasthalesiddhAmRRitatIrthamAhAtmyavarNanam.itx

Category : shiva, mAhAtmya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vaidyanAthasthalamAhAtmya | dashamo.adhyAyaH | 45.2-93||

Latest update : February 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# વૈદ્યનાથસ્થલે સિદ્ધામૃતતીર્થમાહાત્મ્યવર્ણનમ્

- ઋષિ અગસ્ત્યપ્રોક્તમ્ -

વૈદ્યનાથસ્થલે પુણ્યે તસ્મિન્ સિદ્ધામૃતે નરાઃ ॥ ૪૫॥

યસ્મિંકસ્મિંશ્ચિદ્દિવસે ચન્દ્રસૂર્યોપરાગયોઃ ।
સઙ્ક્રાન્તિષુ વ્યતીપાતે પિત્રોર્મૃતદિનેઽથવા ॥ ૪૬॥

સ્નાત્વા તિલાક્ષતૈર્ભક્ત્યા તર્પયન્તિ પિતૄન્ દ્વિજાઃ ।
ત્રિસ્સપ્તકુલમુદ્ધૃત્ય સર્વાન્ કામાનવાપ્ય ચ ॥ ૪૭॥

દેહાન્તે પરમં સ્થાનં યત્સુરૈરપિ દુર્લભમ્ ।
આપ્નુયુસ્તત્પદં સત્યં ભિષગીશપ્રસાદતઃ ॥ ૪૮॥

ભિષગીશસ્થલે યે વૈ સિદ્ધામૃતસરસ્તટે ।
તીર્થશ્રાદ્ધં પ્રકુર્વન્તિ તેષાં મુક્તિર્દ્વિજોત્તમાઃ ॥ ૪૯॥

ગયાયાં પિણ્ડદાનેન પિતૄણાં યાદૃશી ભુવિ ।
તૃપ્તિરાસીત્તથા સિદ્ધામૃતતીર્થસ્ય તર્પણાત્ ॥ ૫૦॥

તીર્થૈરત્યદ્ભુતૈસ્તત્ર સિદ્ધાનામમૃતોપમૈઃ ।
ગઙ્ગા પ્રત્યક્ષભૂતાભૂત્ જટાય્વાખ્યે સરોવરે ॥ ૫૧॥

તસ્માત્ સિદ્ધામૃતમિતિ ત્રિષુ લોકેષુ વિશ્રુતમ્ ।
ગૌરીબ્રહ્મકુજાદીનાં સર્વેષાં સ્નાનમાત્રતઃ ॥ ૫૨॥

યસ્મિન્ સિધ્યન્તિ કામ્યાનિ સિદ્ધામૃતમિતિ શ્રુતમ્ ।
સિદ્ધાસ્સુરાશ્ચ ગન્ધર્વાઃ સ્વર્ગાદાદાય ચામૃતમ્ ॥ ૫૩॥

અભિષિચ્ય કલૌ શમ્ભુમચિકિત્સાચિકિત્સકમ્ ।
યસ્માજ્જટાયુતીર્થં તુ પૂરયામાસુરાદરાત્ ॥ ૫૪॥

તસ્માત્ સિદ્ધામૃતમિતિ પ્રસિદ્ધં જગતીતલે ।
તસ્મિન્ સિદ્ધામૃતે ભાનોર્વારે સ્નાત્વા નરોત્તમાઃ ॥ ૫૫॥

સદારોગ્યાસ્તુ તે શિષ્ટાઃ પ્રસીદન્તિ શિવાસ્પદમ્ ।
સોમવારે નરાઃ સ્નાત્વા તસ્મિન્ સિદ્ધામૃતોદકે ॥ ૫૬॥

સર્વાન્ કામાનવાપ્યાઽત્ર શિવસાયુજ્યમાપ્નુયુઃ ।
ભૌમવારે નરસ્નાત્વા તસ્મિન્ સિદ્ધામૃતોદકે ॥ ૫૭॥

અરુણોદયવેલાયાં સર્વાભીષ્ટપ્રદાયકે ।
સર્વરોગવિનિર્મુક્તાઃ ક્ષેત્રલાભમવાપ્નુયુઃ ॥ ૫૮॥

કિઞ્ચિદભ્યુદિતે સૂર્યે તસ્મિન્ સિદ્ધામૃતે શુભે ।
ભૌમવારે નરસ્નાત્વા વૈદ્યનાથં મહેશ્વરમ્ ॥ ૫૯॥

યે સેવન્તે નરા ભક્ત્યા દીર્ઘમાયુરવાપ્ય ચ ।
આરોગ્યં જયમાસાદ્ય ક્ષુદ્રરોગાન્ વિધૂય ચ ॥ ૬૦॥

ભોગાન્ ભુક્ત્યા મહાભાગાઃ શિવસાયુજ્યમાપ્નુયુઃ ।
ભૌમવારે નરસ્નાત્વા તસ્મિન્ સિદ્ધામૃતે જલે ॥ ૬૧॥

હૃદમ્બુજે વૈદ્યનાથં ધ્યાયન્તસ્તે મુનીશ્વરાઃ ।
પ્રાધાન્યં જગતાં પ્રાપ્ય ચિરં ભોગાનવાપ્નુયુઃ ॥ ૬૨॥

કિઞ્ચિદભ્યુદિતે સૂર્યે ભૌમવારે નરોત્તમાઃ ।
યે સ્નાત્વા નિયમેનૈવ સિદ્ધામૃતમહોદકે ॥ ૬૩॥

કૃષ્ણશ્રીગન્ધકણ્ઠીં તાં ધ્યાયન્તિ હૃદયામ્બુજે ।
કુબેરસન્નિભાસ્તે તુ પ્રમોદન્તે શિવાસ્પદે ॥ ૬૪॥

ભૌમવારે નરઃ સ્નાત્વા તસ્મિન્ સિદ્ધામૃતે વરે ।
યે ધ્યાયન્તિ ગુહં ભક્ત્યા સુદૃઢાઃ પ્રમુદાન્વિતાઃ ॥ ૬૫॥

ક્ષુદ્રરોગવિનિર્મુક્તા દીર્ઘમાયુરવાપ્નુયુઃ ।
ભૌમવારે સમાગત્ય સિદ્ધામૃતતટે શુભે ॥ ૬૬॥

જલં સ્પૃષ્ટ્વા હૃદિ ધ્યાત્વા વૈદ્યનાથં મુદાન્વિતાઃ ।
કુર્વન્તિ પ્રોક્ષણં યે તુ ચુલુકોદકમાત્રકમ્ ॥ ૬૭॥

તિલમાત્રં માષમાત્રં સિદ્ધામૃતજલં શુભમ્ ।
પિબન્તિ પુત્રં સદ્રૂપં શુભં વિદ્યાબલૈર્યુતમ્ ॥ ૬૮॥

અવાપ્ય ભોગાન્ ભુક્ત્વા તે શિવસાયુજ્યમાપ્નુયુઃ ।
પઞ્ચાશત્ કોટિવિસ્તીર્ણે ભૂતલે નિવસન્તિ યે ॥ ૬૯॥

દ્વીપાન્તરે વા ધ્યાયન્તો વૈદ્યનાથં ચ માનસે ।
સ્નાન્તિ ગઙ્ગાજલં સ્નાનજાતં ફલમવાપ્નુયુઃ ॥ ૭૦॥

સૌમ્યવારે નરાસ્નાત્વા તસ્મિન્ સિદ્ધામૃતે વરે ।
સર્વશાસ્ત્રાર્થતત્વજ્ઞાઃ દીર્ઘમાયુરવાપ્નુયુઃ ॥ ૭૧॥

ગુરુવારે નરાસ્નાત્વા તસ્મિન્ સિદ્ધામૃતોદકે ।
બુધ્યા બૃહસ્પતિસમાઃ ત્રિકાલજ્ઞાનિનોઽપિ તે ॥ ૭૨॥

ઇન્દ્રસ્ય સદનં પ્રાપ્ય પૌરોહિત્યમવાપ્નુયુઃ ।
ભૃગુવારે નરાસ્નાત્વા તસ્મિન્ સિદ્ધામૃતે શુભે ॥ ૭૩॥

નિધીન્ સર્વાનવાપ્યાશુ શિવસાયુજ્યમાપ્નુયુઃ ।
સ્થિરવારે નરાસ્નાત્વા તસ્મિન્ સિદ્ધામૃતે વરે ॥ ૭૪॥

શનિપીડાવિનિર્મુક્તાઃ દીર્ઘમાયુરવાપ્નુયુઃ ।
માઘમાસે સમાગત્ય વૈદ્યનાથસ્થલે નરાઃ ॥ ૭૫॥

શુક્લપ્રતિપદારભ્ય ત્વમાપર્યન્તમાસ્તિકાઃ ।
સિદ્ધામૃતે પુષ્કરે યે સ્નાન્તિ તેષામિદં ફલમ્ ॥ ૭૬॥

આયુરારોગ્યમૈશ્વર્યં પુત્રઃ શત્રુજયં ત્વમી ।
સિધ્યન્તિ સત્યં દેહાન્તે મુક્તિરેવ ન સંશયઃ ॥ ૭૭॥

માઘમાસે નરાસ્નાત્વા તસ્મિન્ સિદ્ધામૃતે સુકૃત્ ।
મહારોગવિનિર્મુક્તાઃ ક્ષુદ્રપીડાવિવર્જિતાઃ ॥ ૭૮॥

પઞ્ચપાતકનિર્મુક્તાઃ પુત્રૈર્પૌત્રૈસ્સમન્વિતાઃ ।
ઇહ ભુક્ત્વાખિલાન્ ભોગાન્ સ્વમિત્રૈર્બન્ધુભિસ્સહ ॥ ૭૯॥

ત્રિસપ્તકુલમુદ્ધૃત્ય શિવસાયુજ્યમાપ્નુયુઃ ।
માઘમાસે સકૃત્ સ્નાત્વા ગાયત્રીં વેદમાતરમ્ ॥ ૮૦॥

પઞ્ચાક્ષરં જપં ચાન્યં મન્ત્રં બ્રાહ્મણતર્પણમ્ ।
કૃત્વા સિદ્ધામૃતસ્યાસ્ય વૈભવશ્લોકમાદરાત્ ॥ ૮૧॥

યઃ શ્રુણોતિ નરો ભક્ત્યા કરસ્થાસ્તસ્ય સિદ્ધયઃ ।

યે દીપારાધનં કુર્યુર્વૈદ્યનાથસ્ય ભક્તિતઃ ॥ ૮૨॥

અક્ષિરોગાદ્વિનિર્મુક્તાઃ સર્વાન્ કામાનવાપ્નુયુઃ ।
પ્રદક્ષિણનમસ્કારં શ્રીરુદ્રપઠનં તથા ॥ ૮૩॥

બિલ્વૈરભ્યર્ચનં ચૈવ દાનં બ્રાહ્મણભોજનમ્ ।
યે કારયન્તિ કુર્વન્તિ તે ક્ષુદ્રાદિવિવર્જિતાઃ ॥ ૮૪॥

સર્વવ્યાધિવિનિર્મુક્તાસ્સર્વાન્ કામાનવાપ્ય ચ ।
દેહાન્તે શિવસાયુજ્યં લભેયુર્નાત્ર સંશયઃ ॥ ૮૫॥

ઔષધ્યઃ ફલપાકાન્તા માઘમાસે ફલન્તિ તાઃ ।
દ્વિજાનાં યે પ્રયચ્છન્તિ તત્રત્યાનાં મહાત્મનામ્ ॥ ૮૬॥

ક્ષુદ્રરોગાદિનિર્મુક્તાઃ પુત્રૈર્પૌત્રૈસ્સમન્વિતાઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ તે શૈવં પદમાપ્નુયુઃ ॥ ૮૭॥

પુણ્યે સિદ્ધામૃતે સ્નાત્વા માઘે યે ભક્તિપૂર્વકમ્ ।
ગુલમિશ્રં તિલં પુણ્યં તણ્ડુલં કદલીફલમ્ ॥ ૮૮॥

બદરીફલમન્યદ્વા ધાત્રીફલમનુત્તમમ્ ।
દાનં કુર્વન્તિ મુક્તાસ્સ્યુઃ તે વૈ સંસારબન્ધનાત્ ॥ ૮૯॥

વિદ્યાં ષષ્ટિં યશઃ પુત્રાન્ રાજ્યલક્ષ્મીં સમાપ્નુયુઃ ।
વૈદ્યનાથસ્થલે માઘે પુણ્યે સિદ્ધામૃતે નરાઃ ॥ ૯૦॥

સ્નાત્વા બ્રાહ્મણમેકં વા ત્રિંશચ્ચ ધરણીસુરાન્ ।
ભોજયેદ્યદિ મૃષ્ટાન્નૈઃ ભોગાન્ ભુક્ત્વા યથેચ્છયા ॥ ૯૧॥

સર્વવ્યાધિવિનિર્મુક્તાઃ શિવસાયુજ્યમાપ્નુયુઃ ।
યે શ◌ૃણ્વન્તિ નરા ભક્ત્યા તીર્થમાહાત્મ્યમુત્તમમ્ ॥ ૯૨॥

ગઙ્ગાસ્નાનફલં પ્રાપ્ય શિવસાયુજ્યમાપ્નુયુઃ ॥ ૯૩॥

॥ ઇતિ વૈદ્યનાથસ્થલમાહાત્મ્યે વૈદ્યનાથસ્થલે સિદ્ધામૃતતીર્થમાહાત્મ્યવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ વૈદ્યનાથસ્થલમાહાત્મ્યમ્ । દશમોઽધ્યાયઃ । ૪૫.૨-૯૩॥

- .. vaidyanAthasthalamAhAtmyam . dashamo.adhyAyaH . 45.2-93..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય describes the merits of visiting and conducting of certain rites at the Siddhāmṛta Tīrtha સિદ્ધામૃત તીર્થ located in the Vaidyanātha Sthala વૈદ્યનાથ સ્થલ. He mentions especially about conducting these rites on various Vāra વાર, the month of Māgha માઘ and reaping several merits including relief from Śanipīḍā શનિપીડા and achieving ŚivaSāyujya શિવસાયુજ્ય.

Encoded and proofread by Ruma Dewan

---

*Vaidyanathasthale Siddhamritatirthamahatmyavarnanam*
pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*